# INDIAN SCHOOL AL WADI AL KABIR

| Class: IX | Department: Sanskrit 2nd language | Date of submission: NA |
|---|---|---|
| **प्रश्न – उत्तर** | Topic: **न खलु वयस्तेजो हेतुः** | Note: Pl. file in portfolio |

**१. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तराणि लिखत —**

**(क) खुदीरामस्य जन्म कुत्र अभवत्?**

**उत्तर** - खुदीरामस्य जन्म बङ्गप्रान्ते मेदिनीपुरनामके जनपदे मोहोबनी-ग्रामे अभवत्।

**(ख) खुदीरामः किमर्थं व्यथितः भवति स्म?**

**उत्तर** - खुदीरामः देशवासिषु जायमानान् अत्याचारान् दृष्ट्वा व्यथितः भवति स्म।

(ग) सत्येन्द्रनाथः किम् उपदिष्टवान्?

**उत्तर** - सत्येन्द्रनाथः उपादिशत् — "क्रान्ति कार्यं कर्तुं शरीरं वज्रसदृशं दृढं, बुद्धिः असिधारा इव तीक्ष्णा, मनः गङ्गाजलमिव निर्मलं च भवेत् इति " ।

(घ) खुदीरामः कदा पर्यन्तं पादत्राणं न धरिष्यामि इति प्रतिज्ञातवान्?

**उत्तर** - खुदीरामः प्रतिज्ञातवान् यत् 'यावत् भारतम् आङ्ग्लशासनात् मुक्तं न भविष्यति तावत् पादत्राणं न धरिष्यामि ' इति।

(ङ) किमर्थं न्यायाधीशः आङ्ग्लाः अधिकारिणः च चकिताः?

**उत्तर** – मृत्युदण्डस्य घोषणाम् श्रुत्वापि खुदीरामस्य मुखे प्रसन्नता, शान्तिः, तृप्तिः, तेजः च आसीत्। तत् दृष्ट्वा न्यायाधीशः आङ्ग्लाः अधिकारिणः च चकिताः।

**२. अधः प्रदत्तेषु वाक्येषु किं वाक्यं सत्यं किं च असत्यम् इति सूचयत —**

(क) देशभक्तानां जीवनं राष्ट्राय समर्पितं भवति। **सत्यम्**

(ख) निर्दयः किङ्ग्ज़फोर्ड् बालान् अपि दण्डयति स्म। **सत्यम्**

(ग) खुदीरामस्य आक्रमणेन किङ्ग्ज़फोर्ड् मृतः। **असत्यम्**

(घ) खुदीरामः किङ्ग्ज़फोड्र्महोदयस्य रथस्य उपरि विस्फोटकं क्षिप्तवान्। **सत्यम्**

(ङ) खुदीरामः बालानां सङ्घटनं कृत्वा पदयात्राम् आयोजयति स्म। **सत्यम्**

**३. अधः प्रदत्तानां संवत्सराणां शब्दा नाम् अङ्कैः सह मेल नं कुरुत —**

(क) सप्तचत्वारिंशदधिक-नवदशशततमं वर्षम् **१. १९४७**

(ख) अष्टाधिक-नवदशशततमं वर्षम् **२. १९०८**

(ग) पञ्चाशदुत्तर-नवद शशततमं वर्षम् **३. १९५०**

(घ) पञ्चाधिक-नवद शशततमं वर्षम् **४. १९०५**

(ङ) नवाशीत्यधिक-अष्टादशशततमं वर्षम् **५. १८८९**

**४. अधः प्रदत्तानिपदानि आधृत्य चित्रं दृष्ट्वा पञ्च वाक्यानि लिखत –**

उद्यानं, गृहाणि , पक्षिणः, पुष्पाणि , स्वच्छता,
द्विचक्रिका, पर्वतः, वृक्षाः , सूर्यः , मेघाः

(क) इदं एकं सुन्दरम् उद्यानम् अस्ति ।

(ख) आकाशे श्वेतवर्णः मेघाः सन्ति ।

(ग) तत्र अनेकानि सुन्दराणि गृहाणि सन्ति ।

(घ) उद्याने सर्वत्र स्वच्छता अस्ति ।

(ङ) उद्याने अनेकानि पुष्पाणि विकसन्ति ।

## ५. सन्धिच्छेदं कुरुत –

| | |
|---|---|
| (क) इत्यादयः - | इति + आदयः |
| (ख) सर्वेऽपि - | सर्वे + अपि |
| (ग) कश्चित् – | कः + चित् |
| (घ) प्रत्येकम् – | प्रति + एकम् |
| (ङ) वयस्तेजसः – | वयः + तेजसः |
| (च) अचिरादेव - | अचिरात् + एव |

**६. विग्रहवाक्यं दृष्ट्वा पाठ्यपुस्तकात् समस्तपदानि चित्वा पूरयत –**

| | | | |
|---|---|---|---|
| (क) देशस्य भक्ताः | - | **देशभक्ताः** | (षष्ठी-तत्पुरुषसमासः) |
| (ख) बालः च क्रान्तिवीरः च | - | **बालः च असौ क्रान्तिवीरः** | (कर्मधारय समासः) |
| (ग) वज्रेण सदृशम् | - | **वज्रसदृशम्** | (तृतीया - तत्पुरुषः) |
| (घ) असेः धारा | - | **असिधारा** | (षष्ठी तत्पुरुषसमासः) |
| (ङ) मृत्युः एव दण्डः | - | **मृत्युदण्डः** | (कर्मधारय समासः) |
| (च) न साधारणः | - | **असाधारणः** | (नञ् - तत्पुरुषः) |
| (छ) निर्गता दया यस्मात् सः | - | **निर्दयः** | (बहुव्रीहि समासः) |

**७. लङ्लकारः, क्तवतु-प्रत्ययः, स्म, क्त प्रत्ययः – एते सर्वेऽपि भूतकालं सूचयन्ति। अधः दत्तानि वाक्यानि सूचनानुसारं परिवर्त यत –**

यथा – खुदीरामः हुतात्मा जातः। **(लङ्-लकारः)**

खुदीरामः हुतात्मा अजायत ।

**(क) वन्दे मातरम् इत्यादयः घोषणाः भवन्ति स्म। (लङ्-लकारः)**

वन्दे मातरम् इत्यादयः घोषणाः अभवन्।

**(ख) सत्येन्द्रनाथः खुदीरामम् उपादिशत्। (क्तवतु-प्रत्ययः)**

सत्येन्द्रनाथः खुदीरामम् उपादिष्टवान्।

**(ग) सः नवमीं कक्षां पूर्णां कर्तुं न शक्तवान्।** **(लङ्-लकारः)**

सः नवमीं कक्षां पूर्णां कर्तुं न अशक्नोत् ।

**(घ) क्रान्तिवीराः आङ्ग्ला नां मनसि आतङ्कम् अजनयन्।** **(स्म)**

क्रान्तिवीराः आङ्ग्ला नां मनसि आतङ्कम् जनयन्ति स्म ।

**(ङ) प्रफुल्लः भुशुण्ड्या गोलि काप्रहारं कृतवान्।** **(लङ्-लकारः)**

प्रफुल्लः भुशुण्ड्या गोलि काप्रहारं अकरोत्।

**८. उदाहृणानुसारं चित्-प्रत्ययान्तपदानि प्रयुज्य रिक्त स्था ने पूर्णवाक्यं लिखत —**

कश्चित्, काचित्, किञ्चित्, कुत्रचित्, कदाचित्

| | |
|---|---|
| (क) बालकः गच्छति। | कश्चित् बालकः गच्छति । |
| (ख) बालिका गच्छति। | काचित् बालिका गच्छति। |
| (ग) फलं खादतु । | किञ्चित् फलं खादतु । |
| (घ) लेखनी लुप्ता। | कुत्रचित् लेखनी लुप्ता। |
| (ङ) सः आगच्छेत्। | कदाचित् सः आगच्छेत् |

**९. अधः प्रदत्तानि युगलपदानि अव्ययानि सन्ति । तेषां प्रयोगः अधः प्रदत्तेषु वाक्येषु प्रदर्शितः । ध्यानेन पठन्तु रिक्तस्थानानि च पूरयन्तु—**

क) सुभाषचन्द्रः वदति .....**यत्** ..... भवन्तः मह्यं रुधिरं यच्छन्तु अहं भवद्भ्यः स्वातन्त्र्यं प्रयच्छामि .............**इति** ........... ।

(ख) ..........**यदा** ............. अर्जुनः भीष्मद्रोणादीन् अपश्यत् .........**तदा** ........ शोकं प्राप्नोत् ।

(ग) श्रीरामः भरतम् उक्तवान् ..... **यत्**...... जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ... **इति**... ।

(घ) ......... **यदा**........... भरतः अयोध्यां प्राप्तवान् ......... **तदा**....... श्रीरामः तत्र नासीत् ।

(ङ) .. **यद्यपि** ... खुदीरामाय मृत्युदण्डः उद्घोषितः .. **तथापि** ..... सः प्रसन्नवदनः आसीत् ।

(च) **.......... यदा..........** वृष्टिः भवति ........ **तदा**......... कृषकाः सन्तुष्टाः भवन्ति ।

(छ) ......... **यद्यपि**.... खुदीरामः बालः ......... **तथापि...** सः देशकार्यं कृतवान्।

(ज) .......... **यथा**....... कार्यं करोति ......... **तथा** ......... फलं प्राप्नोति।

(झ) प्रफुल्ल-खुदीरामाभ्यां ... **यद्यपि**.... विस्फोटकं प्रक्षिप्तम् .. **तथापि..** किङ्ग्ज़फोर्डः न मृतः।

(ञ) ........ **यदा**...... अध्ययनं सुदृढं भवति ............ **तदा**.... ज्ञानं विकसितं भवति।

(ट) ....... **यद्यपि**..... खुदीरामः आङ्ग्लानां हस्तगतः **...** **तथापि**... सः ततः बहिरागतः।

यस्तु क्रियावान् मनुजः स विद्वान्

**१. भगतसिंहः, मङ्गलपाण्डे, चन्द्रशेखरः, लक्ष्मीबाई, बालगङ्गाधरतिलकः इत्येतेषां क्रान्तिवीराणां जीवनचरितं संगृह्य ततः एकां घटनां कक्षायां वदत ।**

**२. पाठे विद्यमानानि अव्ययपदानि संगृह्य दश (१०) वाक्यानि रचयत ।**

**३. खुदीरामस्य जन्म नवाशीत्यधिके अष्टादशशततमे वर्षे (१८८९) दिसम्बरमासस्य तृतीये दिनाङ्के अभवत् । एवंप्रकारेण स्वविषये लिखन्तु ।**

(क) मम जन्म ..........................................................................................
अभवत् ।

(ख) पितुः जन्म ........................................................................................
अभवत् ।

(ग) मातुः जन्म
..........................................................................................अभवत् ।

(घ) भ्रातुः जन्म ......................................................................................
अभवत् ।

(ङ) भगिन्याः जन्म ..................................................................................
अभवत् ।

.......................... 000 ......................